पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

।। श्रीः ।।

# वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्येण

सङ्कलितम्

राष्ट्रिय संस्कृत संस्थानम्

नई दिल्ली

॥ श्रीः ॥

# वाचस्पत्यम्

## (बृहत् संस्कृताभिधानम्)


गवर्नमेंटसंस्कृतमहाविद्यालय–दर्शन–व्याकरणाध्यापक –

**श्रीतारानाथ–तर्कवाचस्पति–भट्टाचार्येण**

सङ्कलितम्

तेनैव संस्कृतम्


प्रथमो भागः


**राष्ट्रिय संस्कृत संस्थान**

मानित विश्वविद्यालय

(मानवसंसाधन विकास मंत्रालय, भारत सरकार के अधीन)

56–57 इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली – 110058

# PREFACE

The profound learning and indefatigable industry of Pandit Taranath Tarkavachaspati, one of the professors of the Calcutta Sanskrit College, has been well known to all in India interested in the classical language of the Hindus and has extended to England and Germany, where his numerous works command a wide circulation among Sanskrit Scholars.

His edition of Panini's grammar with his own commentary was published in 1863 with the patronage of the Government of Bengal on the recommendation of Mr. E. B. Cowell M. A. at that time Principal of the Calcutta Sanskrit College and now professor of Sanskrit in the University of Cambridge.

Pandit Taranath has been for many years collecting materials for a Sanskrit Dictionary, which shall have a wider and deeper scope than Wilson's Sanskrit Dictionary and the Sabdakalpadruma by the late Raja Radha kanta Deva. It will moreover contain explanations of terms in the Tantras, Philosophy, Rhetoric and Law which are not fully given in the published portions of Bohtlingk's Dictionary. These Dictionaries are written respectively in English, in Sanskrit with Bengali characters and in German. The Pandit's Dictionary will have the explanations in Sanskrit, so as to be available for the use of both Hindu and European Scholars.

When I had the honor to officiate in 1865 as Director of Public Instruction, I brought to the notice of Sir Cecil Beadon the Lieutenant Governor of Bengal, the desire of Pandit Taranath to publish such a Dictionary, and His Honor in consideration of the acknowledged fitness of the learned Pandit for the preparation of the work, was pleased to accord to it the patronage of the Government of Bengal in the following letter, from the Junior Secretary of the Bengal Government to the Director of Public Instruction No. 507 dated Fort William the 26th January 1866.

"I am directed to acknowledge the receipt of your office letter N. 2 dated the 3rd instant and in reply to convey the Lieutenant Governor's sanction to the purchase of 200 copies at Rupees 50 per copy aggregating Rupees 10,000, of the Sanskrit Dictionary in its complete form which Pandit Tarkavachaspati the Grammar Professor of the Sanskrit College engages to compile within a period not exceeding five years."

"No sum whatever, I am to add, will be paid unless the work is completed."

An extension of time for five years longer was granted for the preparation of the work by Sir William Gray, the Lieutenant Governor of Bengal, in the letter from the Bengal Government No. 3480 dated the 12th December 1870.

**H. Woodrow. M. A.**
Inspector of Schools, Lower provinces of Bengal,
and formerly Fellow of Caius College, Cambridge.

# CONTENTS


1. Panini on genders
2. On the suffixes
3. On the primitive and derivative words
4. The derivation and different meanings with illustrations of all the words which are found in the Wilson's Sanskrit dictionary and Radhakanta's Sabdakalpadruma. Also numerous words not to be found in the said or any previous Dictionaries
5. The derivation and different meanings of the words of the Vedas
6. Numerous Vaidik words not to be found in Bohtlingk's Sanskrit and German Dictionary
   Technical words and doctrines of the following systems of Philosophy are fully explained
   Charvaka, Madhyamika, Yogachar, Vaibhashika, Soutrantika, Arhata, Ramanuja, Madhva, Pashupata, Saiva, Pratyavijna, Rasheswara, Panini, Nyaya, Vaisheshika, Mimansha, Sankhya, Patanjala, and Vedanta
7. The technical terms of the Shrauta and Grihya sutra
8. The technical words of Hindu law
9. The plan and scope of all the Purans and Upapurans
10. Plan and scope of the Mahavarat and Ramayana
11. The History of the ancient kings of India as far as gathered from the Purans and Upapurans
12. The position and description of the different countries according to Hindu ancient Geography
13. The technical terms of Hindu medical science are fully explained; also an account of Hindu anatomy and the preparation of the drugs
14. The explanations of the technical terms of Hindu astronomy. Also the theory of the celebrated Hindu astronomers regarding the celestial regions
15. The principles of Hindu astrology
16. The technical words of the Tantras, Politics, Rhetoric, Prosody, Musical science, Military science, Kookery, Siksha, Kalpa, science on Horses, Hatyoga, Vastushastra
17. Classification of the Vedas

स्तोत्राण्यग्निष्टोम" इत्यादिना सप्रपञ्चं दर्शितः। अग्निष्टोम शब्दस्य व्युत्पत्तिर्भाष्यकृता सायणाचार्य्येण दर्शिता यथा "यज्ञायज्ञीय इत्यस्यामाग्नेय्यामुत्पन्नेन अग्नेष्टोमसाम्ना समाप्तेरग्निष्टोम इतिनाम सम्पन्नमिति"। तद्विधानपरिपाटी च वौधायनीये केशवस्वामिना दर्शिता तत एव साऽवगन्तव्या। ताण्ड्ये षष्ठाध्याये च "अग्निष्टोमे द्वादश स्तोत्राणि द्वादश शस्त्राणी"त्युक्त्वा अष्टमाध्यायपर्य्यन्तं यानि स्तोत्राणि शस्त्राणि वा प्रयोज्यानि तान्यभिहितानि तानि च तत एवावगन्तव्यानि तेषां स्वरूपादि तत्तच्छब्दार्थे वक्ष्यते तत्र अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रं प्रगीतमन्त्रसाध्या तु स्तोत्रमिति तयोर्भेदः। एकाहसाध्ये अग्निष्टुन्नामके यज्ञे च तत् प्रमाणम् अग्निष्टुच्छब्दे। अग्निष्टोमस्य व्याख्यानः कल्पः ठक्। आग्निष्टोमिकः अग्निष्टोमबोधककल्पे।

**अग्निष्टोमसाम** न० अग्निष्टोमे अवसाने विहितं साम गानविशेषः। अग्निष्टोमयज्ञसमापके तृतीयसवने विहिते "यज्ञायज्ञीय" इत्यस्यामाग्नेय्यामृचि गीयमाने सामवेदे "प्रकृतौ (अग्निष्टोमे) तृतीयसवने आर्भवपवमानस्तोपरि यज्ञायज्ञीयं साम गीयते तेन च साम्ना अग्निष्टोमस्य समाप्यमानत्वादग्निष्टोमसामेत्युच्यते इति सा० भा०। "ब्रह्मणो वा एष रसो यद्यज्ञायज्ञीयं स्तुवन्ति ब्रह्मणएव रसे यज्ञं प्रतिष्ठापयन्तीति" ताण्ड्यब्राह्मणम् तच्च साम यज्ञायज्ञीयशब्दे वक्ष्यते।

**अग्निष्ठ** पु० अग्नौ स्थातुमर्हति स्था—क षत्वम्। वह्नौ स्थिति योग्ये लौहमये कटाहादिपात्रे।

**अग्निसंस्कार** पु० अग्निना संस्कारः मन्त्रपूर्व्वकदाहः। विधानेन अग्निकृतदाहे। "अनाथस्याग्निसंस्कारं यः कुर्य्याद्वा दयान्वितः" इति काशी०।

**अग्निसङ्काश** त्रि० अग्निरिव सङ्काशते काश-दीप्तौ अच्। अग्नितुल्यवर्णे तत्तुल्यतेजस्के च।

**अग्निसम्भव** पु० अग्निरिव सम्भवति सम्+भू—अच्। अरण्यकुसुम्भे। ५त० स्वर्णे न०। अग्निसम्भूतमात्रे त्रि०।

**अग्निसहाय** पु० अग्निना सह अयते अय—अच् ३त०। वायौ, धूमे च। अग्निसहायधूमवद्वर्णवत्त्वात् शीघ्रगतित्वाच्च वनकपोते च।

**अग्निसाक्षिक** त्रि० अग्निःसाक्षी यत्र कप्। वह्निं साक्षीकृत्य कृते कर्म्मणि। "सख्यं कृत्वाग्निसाक्षिकमिति" रामा०।

**अग्निसार** न० अग्नौ सारो यस्य अत्यन्तानलोत्तापनेऽपि सारांशादहनात्। रसाञ्जने ६त०। वह्निसारे तु अस्त्री।

**अग्निस्तम्भ** पु० अग्निः दाहशक्तौ निरुध्यते अनेन। अग्निदाहनशक्तिनिरोधके मन्त्रे, ओषधे च। ६त०। अग्नेर्दाहशक्तिप्रतिरोधे पु०।

**अग्निष्वा(ख)त्त** पु० ब०व० अग्नितः (श्राद्धीयविप्रकरकृशानलात् सुष्ठु आत्तं ग्रहणं येषां आ-दा-क्त षत्वमिति बहवः। मरीचिपुत्रे पितृगणविशेषे। "अग्निष्वा(खा)त्ताः बर्हिषदः ऊष्मपा आज्यपास्तथेति" मनुः। तैत्तिरीयब्राह्मणे तु अन्यथा निरुक्तं यथा "अग्निष्वात्तानृतुमतो हवामहे। नराशंसे सोमपीथं य आशुः। ते नो अर्वन्तः सुहवा भवन्तु। शन्नो भवन्तु द्विपदे शं चतुष्पदे" इति "अग्निष्वात्ता अग्निष्वात्तनामकाः पितरः पितृविशेषाः। ते च चातुर्मास्यगतपितृयज्ञब्राह्मणे स्पष्टमभिहिताः, "ये वा अयज्वानो गृहमेधिनस्ते पितरोऽग्निष्वात्ता" इति। मनुष्यजन्मन्यग्निष्टोमादियागमकृत्वा स्मार्त्तकर्म्मनिष्ठाः सन्तो मृत्वा च पितृत्वं गताः। तानग्निष्वात्तान्" इति तद्भाष्ये माधवाचार्य्यः।

**अग्निहुत्** पु० अग्निं हुतवान् हु—क्विप् ६त०। कृताग्निहवने अग्निहोत्रिणि।

**अग्निहोत्र** न० अग्नये हूयतेऽत्र हु—त्र ४त०। मन्त्रकरणवह्निस्थापनपूर्व्वतदुद्देश्यकहोमे। अग्निहोत्रसम्बन्धित्वात् हविषि, वह्नौ पु०। काञ्चिदाख्यायिकामुपक्रम्य अग्निहोत्रशब्दनिरुक्तिविधानाद्युक्तं तैत्तिरीयब्राह्मणे "सोऽग्निरबिभेत् आहुतिभिर्वै मामाप्नोतीति स प्रजापतिं पुनः प्राविशत् तं प्रजापतिरब्रवीत् जायस्वेति सोऽब्रवीत् किं भागधेयमभिजनिष्य इति तुभ्यमेवेदं हूयाता इत्यब्रवीत् सएतद्भागधेयमभ्यजायत। यदग्निहोत्रम्" इति पुरा प्रजापतेस्तापं दृष्ट्वा पलायनादुपरतोऽग्निः प्रजापतेस्त्वपक्रमप्यागत एव, ततः प्रजापतिस्तस्मिन्नग्नौ पूर्व्वोक्तं घृतं स्वाहाकारेण यामाहुतिं प्रथममजुहोत्। तदाहुतिसामर्थ्येन पुरुषमसृजत। तथा द्वितीयाद्याहुतिभिः अश्वादीनसृजत। ततः प्रजानां पुनरुत्पत्तेः स्वस्य प्रजापतित्वं सुस्थितम्। तदानीमग्निर्भीतोऽभूत्। तस्यायमभिप्रायः। प्रजापतिः पुनः पुनराहुतिभिरेव मां प्राप्नोति न तु भागं प्रयच्छति। तास्वाहुतीर्देवा एव गृह्णन्ति। तस्माद्भागरहितः सेवितुं न शक्नोमीति विचार्य्य पूर्व्ववत् पलायनमकृत्वा तस्मिन् प्रजापतावेव प्रविष्टः। स च प्रजायस्वेति पुनः पुनरग्निमब्रवीत् स चाग्निस्तदुदर एव स्थित्वा भागरहितोऽहं क्षुधितः सेवितुं न शक्नोमि भागो मेऽपेक्षितः। किं भागमभिलक्ष्याह-

|| श्रीः ||

# वाचस्पत्यम्

## (बृहत् संस्कृताभिधानम्)

गवर्नमेंटसंस्कृतमहाविद्यालय–दर्शन–व्याकरणाध्यापक –

**श्रीतारानाथ–तर्कवाचस्पति–भट्टाचार्येण**

सङ्कलितम्

तेनैव संस्कृतम्

द्वितीयो भागः

**राष्ट्रिय संस्कृत संस्थान**

मानित विश्वविद्यालय

(मानवसंसाधन विकास मंत्रालय, भारत सरकार के अधीन)

56–57 इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली – 110058

तिस्तथा । एते गृहस्थप्रभवश्चत्वारः पृथगाश्रमाः'' मनूक्तेः तत्र ब्रह्मचारी द्विविधः । नैष्ठिक उपकुर्व्वाणश्च मरणान्तं गुरुकुलवासितया कृतब्रह्मचर्य्यः नैष्ठिकः । षट्त्रिंशदब्दादिकं गुरौ वसित्वा गार्हस्थ्यार्थं कृतसमावर्त्तन उपकुर्व्वाणः । गृहस्थोऽपि द्विविधः । अकृतदारः स्नातकः कृतदारश्च । तत्र कृतसमावर्त्तनोऽपि कन्यालाभात् पूर्व्वं धृतस्मार्त्तधर्म्मभेदः स्नातकः । तद्धर्म्माश्च आप्लुतशब्दे ७५२ पृष्ठेऽभिहिताः । कृतदारोऽपि द्विविधः साग्निर्निरग्निश्च साग्निरपि द्विविधः श्रौताग्नियुक्तः स्मार्त्ताग्नियुक्तश्च । वानप्रस्थोऽपि द्विविधः सदारोऽदारश्च "पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा'' मनूक्तेः सदारादारत्वप्रत्ययोः समधिगमात् । तत्र अदारस्य अपचमानाश्मकुट्टकदन्तोलूखलादिसंज्ञा । सदारस्य पचमानसंज्ञा । भिक्षुरपि चतुर्विधः कुटीचक बहूदक हंसपरहंसेतिभेदात् । भिक्षुकोऽपि प्रकारान्तरेण द्विविधः विविदिषासन्यासी विद्वत्संन्यासी च तदेतत् जीवन्मुक्तौ विद्यारण्येन निरूपितं यथा "वक्ष्ये विविदिषान्यासं विद्वन्न्यासञ्च भेदतः । हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च तौ क्रमात् ॥ संन्यासहेतुर्वैराग्यं यदहर्विरजेत्तदा । प्रव्रजेदिति वेदोक्तेस्तद्भेदस्तु पुराणतः । विरक्तिर्द्विविधा प्रोक्ता तीव्रतीव्रतरेति च । सत्यामेव तु तीव्रायां न्यसेद्योगी कुटीचके ॥ शक्तोवहूदके तीव्रतरायां हंससंज्ञिते । मुमुक्षुः परमे हंसे साक्षाद्विज्ञानसाधने । पुत्रदारधनादीनां नाशे तात्कालिकी मतिः । धिक् संसारमितीदृक् स्याद्विरक्तेर्मन्दता हि सा ॥ अस्मिन् जन्मनि मा भूवन् पुत्रदारादयो मम । इति या सुस्थिरा बुद्धिः सा वैराग्यस्य तीव्रता ॥ पुनरावृत्तिसहितो लोको मे मास्तु कश्चन । इति तीव्रतरत्वं स्यान्मन्दे न्यासो न कोऽपि हि ॥ यात्राद्यशक्तिशक्तिभ्यां तीव्रे न्यासद्वयं भवेत् । कुटीचकोवहूदश्चेत्युभावेतौ त्रिदण्डिनौ । द्वयं तीव्रतरे ब्रह्मलोकमोक्षविभेदतः । तल्लोके तत्त्वविद्धंसोलोकेऽस्मिन् परहंसकः ॥ एतेषान्तु समाचाराः प्रोक्ताः पाराशरस्मृतेः । व्याख्यानेऽस्माभिरत्रायं परहंसो विविच्यते । जिज्ञासुर्ज्ञानवांश्चेति परहंसो द्विधा मतः । प्राङ्ज्ञानाय जिज्ञासोर्न्यासं वाजसनेयिनः । "प्रव्राजिनोलोकमेतमिच्छन्तः प्रव्रजन्ति हि'' । एतस्यार्थन्तु गद्येन वक्ष्ये मन्दविबुद्धये ॥ लोको हि द्विविधः आत्मलोकोऽनात्मलोकश्चेति । तत्रानात्मलोकस्य त्रैविध्यं बृहदारण्यके तृतीयाध्याये श्रूयते । "अथ त्रयोवाव लोकाः मनुष्यलोकः पितृलोको देवलोक'' इति । सोऽयं मनुष्यलोकः पुत्रेणैव जय्योनान्येन कर्म्मणा । कर्म्मणा पितृलोको विद्यया देवलोक'' इति । आत्मलोकश्च तत्रैव श्रूयते । "योहवा अस्माल्लोकात् स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्तीति''। "आत्मानमेव लोकमुपासीत'' "स य आत्मानमेव लोकमुपास्ते नहास्य कर्म्म क्षीयत'' इति च । षष्ठाध्यायेऽपि "किं प्रजया करिष्यामो येषां नोऽयमात्माऽयञ्च लोक'' इति । एवञ्च सति एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति'' इत्यत्रात्मलोको विवक्षित इति गम्यते "स वा एष महानज आत्मेति'' प्रक्रान्तस्यात्मन एव एतच्छब्देन परामृष्टत्वात् । लोक्यते अनुभूयत इति लोकः । तथा चात्मानुभवमिच्छन्तः प्रव्रजन्तीति श्रुतेस्तात्पर्य्यार्थः सम्पद्यते । स्मृतिश्च "ब्रह्मविज्ञानलाभाय परहंससमाह्वयः। शान्तिदान्त्यादिभिः सर्व्वैः साधनैः सहितो भवेदिति''। इह जन्मनि जन्मान्तरे वा सम्यगनुष्ठितैर्वेदानुवचनादिभिरुत्पन्नया विविदिषया सम्पादितत्वादयं विविदिषा सन्यासो द्विविधः जन्मापादककर्म्मादित्यागमात्रात्मकः प्रैषोच्चारणपूर्व्वकदण्डधारणाद्याश्रमरूपश्चेति । त्यागश्च तैत्तिरीयादौ श्रूयते "न कर्म्मणा न प्रजया न धनेन, त्यागेनैके अमृतत्वमानशुरिति''। अस्मिंश्च त्यागे स्त्रियोऽप्यधिक्रियन्ते । अतएव मैत्रेयीवाक्यमाम्नायते'' येनाहं नामृता स्यां किमहं तेन कुर्य्याम् यदेव भगवन्! वेद तदेव मे ब्रूहीति''। ब्रह्मचारिगृहस्थवानप्रस्थानां केनचिन्निमित्तेन सन्न्यासाश्रमस्वीकारे प्रतिबद्धे सति स्वाश्रमधर्म्मेष्वनुष्ठीयमानेष्वपि वेदनार्थो मानसकर्म्मादित्यागो न विरुध्यते श्रुतिस्मृतीतिहासपुराणेषु लोके च तादृशानान्तत्त्वविदां बहूनामुपलम्भात् । यस्तु दण्डधारणादिरूपो वेदनहेतुः परमहंसाश्रमः स पूर्व्वैराचार्य्यैर्बहुधा प्रपञ्चित इत्यस्माभिरुपरम्यते । इति विविदिषासंन्यासः ।

"अथ विद्वत्संन्यासं निरूपयामः ॥ सम्यगनुष्ठितैः श्रवणमनननिदिध्यासनैः परतत्त्वं विदितवद्भिः सम्पाद्यमानो विद्वत्संन्यासः । तञ्च याज्ञवल्क्यः सम्पादयामास । तथाहि विद्वच्छिरोमणिर्भगवान् याज्ञवल्क्योविजिगीषुकथायां बहुविधेन तत्त्वनिरूपणेनाश्वलायनप्रभृतीन्मुनीन् विजित्य वीतराग कथायां संक्षेपविस्ताराभ्यामनेकधा जनकं बोधयित्वा मैत्रेयीं बुबोधयिषुस्तस्यास्त्वरया तत्त्वाभिमुख्याय स्वकर्त्तव्यं संन्यासं प्रतिजज्ञे ततस्तां बोधयित्वा संन्यासञ्चकार । तदुभयं मैत्रीयीब्राह्मणस्याद्यन्तयोराम्नायते'' "अथ ह

॥ श्रीः ॥

# वाचस्पत्यम्

## (बृहत् संस्कृताभिधानम्)

गवर्नमेंटसंस्कृतमहाविद्यालय–दर्शन–व्याकरणाध्यापक –
**श्रीतारानाथ–तर्कवाचस्पति–भट्टाचार्येण**
सङ्कलितम्
तेनैव संस्कृतम्

तृतीयो भागः

**राष्ट्रिय संस्कृत संस्थान**
मानित विश्वविद्यालय
(मानवसंसाधन विकास मंत्रालय, भारत सरकार के अधीन)
56–57 इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली – 110058

| वर्णः | स्वरः | कालः | स्थानम् | आभ्यन्तरप्रयत्नः | बाह्यप्रयत्नाः । | |
|---|---|---|---|---|---|---|
| अ | उदात्तानुदात्तस्वरिताः | एकमात्रोह्रस्वः | कण्ठः | विवृतम् | संवारनादघोषाः अल्पप्राणश्च | |
| आ | उदा० २ | द्विमात्रोदीर्घः | कण्ठः | विवृतम् | संवारनादघोषाः अल्पप्राणश्च | |
| अ३ | उदा० २ | त्रिमात्रःप्लुतः | सः | तत् | ते | सच |
| इ | उदा० २ | एकमात्रोह्रस्वः | तालु | तत् | ते | सच |
| ई | उदा० २ | २द्विमात्रोदीर्घः | तत् | तत् | ते | सच |
| इ३ | उदा० २ | त्रिमात्रःप्लुतः | तत् | तत् | ते | सच |
| उ | उदा० ३ | एकमात्रोह्रस्वः | ओष्ठौ | तत् | ते | सच |
| ऊ | उदा० २ | द्विमात्रोदीर्घः | तौ | तत् | ते | सच |
| उ३ | उदा० २ | त्रिमात्रःप्लुतः | तौ | तत् | ते | सच |
| ऋ | उदा० २ | एकमात्रोह्रस्वः | मूर्द्धा | तत् | ते | सच |
| ॠ | उदा० २ | द्विमात्रोदीर्घः | सः | तत् | ते | सच |
| ऋ३ | उदा० २ | त्रिमात्रःप्लुतः | सः | तत् | ते | सच |
| ऌ | उदा० २ | एकमात्रोह्रस्वः | दन्तमूलम् | तत् | ते | सच |
| ऌ३ | उदा० २ | त्रिमात्रःप्लुतः | तत् | तत् | ते | सच |
| अस्य दीर्घाभावेऽपि लकारद्वययोगात् द्विमात्रता | | | दन्तमूलम् | तत् ईषत्स्पृष्टं च | ते | सच |
| ए | उदा० २ | द्विमात्रोदीर्घः | कण्ठतालुनी | विवृतम् | ते | सच |
| ए३ | उदा० २ | त्रिमात्रःप्लुतः | कण्ठतालुनी | तत् | ते | सच |
| ऐ | उदा० २ | द्विमात्रोदीर्घः | कण्ठतालुनी | तत् | ते | सच |
| ऐ३ | उदा० २ | त्रिमात्रःप्लुतः | कण्ठतालुनी | तत् | ते | सच |
| ओ | उदा० २ | द्विमात्रोदीर्घः | कण्ठोष्ठौ | तत् | ते | सच |
| ओ३ | उदा० २ | त्रिमात्रःप्लुतः | कण्ठौष्ठौ | तत् | ते | सच |
| औ | उदा० २ | द्विमात्रोदीर्घः | कण्ठौष्ठौ | तत् | ते | सच |
| औ३ | उदा० २ | त्रिमात्रःप्लुतः | कण्ठौष्ठौ | तत् | ते | सच |
| एषामनुनासिकत्वे उदा० | | यथाप्राप्तम् | यथास्थानं नासिकाऽपि | तत् | यथप्राप्तं बाह्याः | |
| ं अनुस्वारस्य | ० | ० | नासिका | स्पृष्टम् | संवारनादघोषा महाप्राणश्च | |
| ः विसर्गस्य | ० | ० | कण्ठः | स्पृष्टम् | विवारश्वासाघोषा महाप्राणश्च | |
| ᳵक ᳵख | ० | ० | जिह्वामूलम् | स्पृष्टम् | विवारादयः महाप्राणश्च | |
| ᳵप ᳵफ | ० | ० | औष्ठौ | स्पृष्टम् | विवारादयः महाप्राणश्च | |
| क | ० | अर्द्धमात्रा | कण्ठमूलम् | स्पृष्टम् | विवारश्वासाघोषा अल्पप्राणश्च | |
| ख | ० | अर्द्धमात्रा | तत् | तत् | विवारादयः महाप्राणश्च | |
| ग | ० | सा | तत् | तत् | संवारनादघोषा अल्पप्राणश्च | |
| घ | ० | सा | तत् | तत् | संवारादयः महाप्राणश्च | |
| ङ | ० | सा | तत् नासा च | तत् | संवारादयः अल्पप्राणश्च | |
| च | ० | अर्द्धमात्रा | तालु | तत् | विवारादयः अल्पप्राणश्च | |
| छ | ० | सा | तत् | तत् | विवारादयः महाप्राणश्च | |
| ज | ० | सा | तत् | तत् | संवारादयः अल्पप्राणश्च | |

फलत्वात्। जतुकालतयां राजनि० तस्याश्च तत्फल-त्वात्तथात्वम्। [(आल्कुशी) शूकशिम्बायाम् भरतः

**कपिकच्छूरा** स्त्री कपिभ्यः कच्छूं राति ददाति रा—क।

**कपिकन्दुक** न० अपि+कदि—उक अतोलोपः कस्य शिरसः पिकन्दुकम्। शिरोस्थ्नि शब्दच०।

**कपिका** स्त्री कपिरिवाह इव कायति प्रकाशते कश्यत्वात् कै—क। नीलसिन्धुवारवृक्षे राजनि०।

**कपिकेतन** पु० कपिर्हनूमान् केतने यस्य। अर्ज्जुने कपिध्वजे "सान्त्वपूर्वमिदं वाक्यमब्रवीत् कपिकेतनः" भा० आश्व० ८२। यथा च तस्य कपिकेतनता तथावर्णितं भा० व० १५१ अ०। "एवमुक्तस्तु हनुमान् भीमसेनमभाषत। भ्रातृत्वात् सौहृदाच्चैव करिष्यामि प्रियं तव। चमूं विगाह्य शत्रूणां परिघक्तिमदाकुलाम्। यदा सिंहरवं वीर! करिष्यसि महाबल!। तदाहं बृंहयिष्यामि स्वरवेण रवं तव। विजयस्य ध्वजस्थश्च नादान् मोक्ष्यामि दारुणान्। शत्रूणां ये प्राणहराः सुखं येन हनिष्यथ"। कपिध्वजादयोऽप्यत्र।

**कपिकोलि** पु० कपीनां प्रियः कोलिः। (शेओयाकुल) कोलिभेदे रत्नमा०।

**कपिचूड़ा** स्त्री कपीनां चूड़ेव। आम्रातकवृक्षे राजनि०। तस्य कुलस्य कपिचूडातुल्यतया तथात्वम्। [ त्रिका०

**कपिचूत** पु० कपीनां चूत इव प्रियत्वात्। आम्रातकवृक्षे

**कपिज** पु० कपितोजायते जन—ड। कपितैले तुरुष्के (शिलारस) राजनि०।

**कपिजङ्घिका** स्त्री कपेर्जङ्घेव जङ्घा यस्याः संज्ञायां कन्। तैलपिपीलिकायां (तेलोपोका) राजनि० तस्याः कपितुल्यदीर्घजङ्घत्वात्तथात्वम्।

**कपिञ्जल** पुंस्त्री "कपिरिव जवते ईषत् पिङ्गलो वा कमनीयं शब्दं पिञ्जयतीति वा" निरुक्तोक्ता व्युत्पत्तिः पृषो०। १ पक्षिभेदे चातके राजवल्ल० जलयाचनाय तस्य रम्यशब्दकरणात् तथात्वम्। २ तित्तिरौ त्रिका०। तित्तिरिभिद् श्वेत एव ग्राह्यः। "वर्त्तिकालाववर्त्तीर कपिञ्जलकविस्तिराः। कलिङ्गाः कुक्कुटाद्याश्च विष्किराः समुदाहृताः। विकीर्य्य भक्ष्यन्त्येते यस्मात्तस्माद्धि विष्किराः। कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरिः" भावप्र० उक्तेः अतएव 'वसन्ताय कपिञ्जलानालभेत ग्रीष्माय कलविङ्कान् वर्षाभ्यस्तित्तिरीन्" यजु० ४,२०। कपिञ्जलतित्तिरीणां भेदेन निर्द्देशः "कपिञ्जलः कपोत उलूकः शशस्ते निर्ऋत्यै" यजु० २४,३८ तस्य चारुस्वत्वात् तद्देवतोद्देश्येन तत्सर्ग एवात्रालभनम्। "कपिञ्जलादींस्तु सहस्रशस्त्वित पर्य्यग्निकृतान्" कात्या० श्रौ० २०,६,९ उक्तेः। कपिञ्जलमांसगुणाश्च भावप्र० उक्ताः कपिञ्जलादीन् विष्किरानुक्त्वा "विष्किराः मधुरा शीताः कषायाः कटुपाकिनः। वल्याश्च पथ्याश्च दोषघ्ना पथ्यास्ते लघवः स्मृताः"। कपिञ्जलशब्दस्यावर्णान्तत्वेन द्वन्द्वत्वाजभिन्नत्वेन च अर्ध्वशब्देन समासे न आद्युदात्तत्वम्। "अर्श्चं चावर्णं द्व्यच्‌ त्र्यच्" पा० सूत्रात्

**कपिञ्जलन्याय** पु० बहुत्वस्य त्रित्वपर्य्यवसायिताख्यापके न्यायभेदे स च न्यायो यथा "वसन्ताय कपिञ्जलानालभेतेति" श्रुत्या कपिञ्जलगतं बहुत्वं बोधितं तच्च विवक्षितं विधेयसंख्यात्वात् कपिञ्जलस्यान्यतोऽप्राप्तत्वात् विधेयत्वं बहुत्वं च त्रित्वमारभ्य परार्द्धपर्य्यन्तपर्य्यवसन्नमित्यनव्यवसायेनाप्रवृत्त्या वेदाप्रामाण्यापत्तिरिति प्राचोराहुः "प्रथमोपस्थितेस्तन्त्रत्वात्" जै० सू०। त्रित्वोत्पत्त्यनन्तरं त्रित्वव्याप्तिबहुत्ववुद्ध्या चतुष्ट्वं जन्यते तत्र त्रित्वस्य प्रथमोपस्थितत्वात् वेदबोध्यबहुत्वस्य तत्रैव पर्य्यवसानान्नानध्यवसायः संख्यायाम् एकत्वस्येव बहुत्वसंख्यायायां त्रित्वस्यैव प्रथमोपस्थितत्वात्तत्रैव वेदतात्पर्य्यात्। अपेक्षाबुद्धिसहकृतैकत्वलयेण त्रित्वम् एवं तथाविधैकत्व चतुष्केण चतुष्ट्वं जन्यते इति मते तु कारणीभूतापेक्षाबुद्धिलाघवेन प्रथमोपस्थितत्रित्वस्यैव वेदबोध्यता नातोऽप्रवृत्तिः अतएव वैया० भू० संख्यायाम् एकत्वसंख्याया एव ग्रहणे कपिञ्जलालम्भवाक्ये त्रित्वग्रहणं दृष्टान्तीकृतं यथा "अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः। कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते"। "बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात् तद्ग्रहणेव भानवदेकत्वस्य सर्वतः प्रथमोपस्थितत्वमस्तीति भावः"।

**कपितैल** न० कपिभिः शिलायादारणेन निष्पादितं तैलम्। सिह्लके तुरुष्के गन्धद्रव्यभेदे (शिलारस)। "सिह्लकस्तु तुरुष्कः स्याद्यतोयवनदेशजः। कपितैलञ्च संख्यातं तथा च कपिनामकः" भावप्र०। तेन तुरुष्कस्य पयस्वन्द्रैयोद्भवशिलादलनेन कपिभिरुद्भावनात्तस्य तथात्वम्।

**कपित्थ** पु० कपिस्तिष्ठत्यत्र तत्फलप्रियत्वात् स्था—क पृषो०। (कएतवेल) वृक्षभेदे "त्रिरात्रान्ते त्रिरात्रान्ते कपित्थवदराशनः" भाग० ४,८,६४। अस्य गुणपथ्यादि भावप्र० उक्तं यथा। "कपित्थस्तु दधित्थः स्यात्तथा पुष्पफलः स्मृतः। कपिप्रियोदधिफलस्तथा दन्तशठोऽपि च। कपित्थमामं

॥ श्रीः ॥

# वाचस्पत्यम्

## (बृहत् संस्कृताभिधानम्)

गवर्नमेंटसंस्कृतमहाविद्यालय–दर्शन–व्याकरणाध्यापक –

**श्रीतारानाथ–तर्कवाचस्पति–भट्टाचार्येण**

सङ्कलितम्

तेनैव संस्कृतम्

चतुर्थो भागः

**राष्ट्रिय संस्कृत संस्थान**

मानित विश्वविद्यालय

(मानवसंसाधन विकास मंत्रालय, भारत सरकार के अधीन)

56–57 इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली – 110058

**गङ्गाक्षेत्र** न० ६त०। "तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते" इत्युक्ते गङ्गातीरादुभयपार्श्वस्थक्रोशद्वयमितस्थाने। [(गाँगचिल) ख्याता०।

**गङ्गाचिल्ली** स्त्री गङ्गायास्तथा नदीस्था चिल्ली। चिल्लभेदे

**गङ्गाज** पु० गङ्गातो जायते जन–ड। १भीष्मे २कार्त्तिकेये च तत्र भीष्मस्य गङ्गातो जन्मकथा।

"स राजा शान्तनुर्धीमान् देवराजसमद्युतिः। बभूव मृगयाशीलः सततं वनगोचरः। स मृगान् महिषांश्चैव विनिघ्नन् राजसत्तमः। गङ्गामनुचचारैकः सिद्धचारणसेविताम्। स कदाचिन्महाराज! ददर्श परमां स्त्रियम्। जाज्वल्यमानां वपुषा साक्षाच्छ्रियमिवापराम्। सर्वानवद्यां सुदतीं दिव्याभरणभूषिताम्। सूक्ष्माम्बरधरामेकां पद्मोदरसमप्रभाम्। तां दृष्ट्वा हृष्टरोमाऽभूद्विस्मितो रूपसम्पदा। पिबन्निव च नेत्राभ्यां नातृप्यत नराधिपः। सा च दृष्ट्वैव राजानं विचरन्तं महाद्युतिम्। स्नेहादागतसौहार्दा नातृप्यत विलासिनी। तामुवाच ततो राजा सान्त्वयन् श्लक्ष्णया गिरा। देवी वा दानवी वा त्वं गन्धर्वी वाथ वाप्सराः। यक्षी वा पन्नगी वापि मानुषी वा सुमध्यमे!। याचे त्वां सुरगर्भाभे! भार्य्या मे भव शोभने।" भा० आ० ९७अ०।

"एतत् श्रुत्वा वचो राज्ञः सस्मितं मृदु वल्गु च। वसूनां समयं स्मृत्वाऽथाभ्यागच्छदनिन्दिता। उवाच चैवं राज्ञः सा ह्लादयन्ती मनो गिरा। भविष्यामि महीपाल! महिषी ते वशानुगा। यत्तु कुर्य्यामहं राजन्! शुभं वा यदि वाऽशुभम्। न तद्वारयितव्याऽस्मि न वक्तव्या तथाऽप्रियम्। एवं हि वर्त्तमानेऽहं त्वयि वत्स्यामि पार्थिव!। वारिता विप्रियञ्चोक्ता त्यजेयं त्वामसंशयम्। तथेति राज्ञा सा तूक्ता तदा भरतसत्तम!। प्रहर्षमतुलं लेभे प्राप्य तं पार्थिवोत्तमम्। आसाद्य शान्तनुस्ताञ्च बुभुजे कामतो वशी। न प्रष्टव्येति मन्वानो न स तां किञ्चिदूक्तवान्। स तस्याः शीलवृत्तेन रूपौदार्य्यगुणेन च। उपचारेण च रहस्तुतोष जगतीपतिः। दिव्यरूपा हि सा देवी गङ्गा त्रिपथगामिनी। मानुषं विग्रहं कृत्वा श्रीमन्तं वरवर्णिनी। भाग्योपनतकामस्य भार्य्येवोपस्थिताऽभवत्। शान्तनोराजसिंहस्य देवराजसमद्युतेः। सम्भोगस्नेहचातुर्य्यैर्हावलास्यैर्मनोहरैः। राजानं रमयामास तथा रेमे तथैव सः। स राजा रतिसक्तत्वादुत्तमस्त्रीगुणैर्हृतः। संवत्सरानृतून् मासान् न बुबुधे स बहून् गतान्। रममाणस्तया सार्द्धं यथाकामं नरेश्वरः। अष्टावजनयत् पुत्रांस्तस्याममरसन्निभान्। जातं जातं च सा पुत्रं क्षिपत्यम्भसि भारत!। प्रीणामि च त्वामित्युक्त्वा गङ्गास्रोतस्यमज्जयत्। तस्य तन्न प्रियं राज्ञः शान्तनोरभवत्तदा। न च तां किञ्चनोवाच त्यागाद्भीतो महीपतिः। अथैनामष्टमे पुत्रे जाते प्रहसतीमिव। उवाच राजा दुःखार्त्तः परीप्सन् सुतमात्मनः। मा वधीः काऽसि कस्याऽसि किन्नु हंसि सुतानिति। पुत्रघ्नि! सुमहत् पापं संप्राप्तं ते विगर्हिते!। स्त्र्युवाच। पुत्रकाम! न ते हन्मि पुत्रं पुत्रवतां वर!। जीर्णोऽस्तु मम वासोऽयं यथा स समयः कृतः। अहं गङ्गा जह्नुसुता महर्षिगणसेविता। देवकार्य्यार्थसिद्ध्यर्थमुषिताऽहं त्वया सह। इमेऽष्टौ वसवो देवा महाभागा महौजसः। वशिष्ठशापदोषेण मानुषत्वमुपागताः। तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते। मद्विधा मानुषी धात्री लोके नास्तीह काचन। तेषाञ्च जननीहेतोर्मानुषत्वमुपागता। जनयित्वा वसूनष्टौ जिता लोकास्त्वयाऽक्षयाः। देवानां समयस्त्वेष वसूनां संश्रुतो मया। जातं जातं मोक्षयिष्ये जन्मतो मानुषादिति। तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः। स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रतम्। एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः। मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम्" ९८अ०।

"स कदाचिन्मृगं विद्ध्वा गङ्गामनुसरन्नदीम्। भागीरथीमल्पजलां शान्तनुर्दृष्टवान्नृपः। तां दृष्ट्वा चिन्तयामास शान्तनुः पुरुषर्षभः। स्यन्दते किं न्वियं नाद्य सरिच्छ्रेष्ठा यथा पुरा। ततो निमित्तमन्विच्छन्ददर्श स महामनाः। कुमारं रूपसम्पन्नं बृहन्तञ्चारुदर्शनम्। दिव्यमस्त्रं विकुर्वाणं यथा देवं पुरन्दरम्। कृत्स्नां गङ्गां समावृत्य शरैस्तीक्ष्णैरवस्थितम्। तां शरैराचितां दृष्ट्वा नदीं गङ्गां तदन्तिके। अभवद्विस्मितो राजा दृष्ट्वा कर्मातिमानुषम्। जातमात्रं पुरा दृष्ट्वा तं पुत्रं शान्तनुस्तदा। नोपलेभे स्मृतिं धीमानभिज्ञातुं तमात्मजम्। स तु तं पितरं दृष्ट्वा मोहयामास मायया। संमोह्य तु ततः क्षिप्रं तत्रैवान्तर-

॥ श्रीः ॥

# वाचस्पत्यम्

## (बृहत् संस्कृताभिधानम्)

गवर्नमेंटसंस्कृतमहाविद्यालय–दर्शन–व्याकरणाध्यापक –

**श्रीतारानाथ–तर्कवाचस्पति–भट्टाचार्येण**

सङ्कलितम्

तेनैव संस्कृतम्

पंचमो भागः

**राष्ट्रिय संस्कृत संस्थान**

मानित विश्वविद्यालय

(मानवसंसाधन विकास मंत्रालय, भारत सरकार के अधीन)

56–57 इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली – 110058

धीकरणं विभक्ता अपि स्थावरे समाः किन्तु ताविभक्ता इति दण्डापूपन्यायेन व्याख्येयम्। अन्यथा विभागो निरर्थकः स्यात्। अतश्च यदुक्तं स्मृत्यन्तरे "एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः" इति। तत्क्रमायातविभक्तस्थावरविषयं स्वप्नानधिकस्थावरविषयं चेति मन्तव्यम्। स्वार्जितमपि किञ्चित्प्राप्तव्यवहारेषु पुत्रेषु सत्सु तदनुमत्यैव दातव्यमित्यभिप्रेत्याह भगवान् व्यासः। "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम्। असम्भूय सुतान् सर्वान्न दानन्न च विक्रयः। ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः। वृत्तिं च तेऽभिकाङ्क्षन्ति न दानन्न च विक्रयः" इति। अत्रोत्तरपद्यं पूर्वपद्यदर्शितवृहस्पतिवचनार्थस्य दण्डापूपन्यायप्रदर्शनेन दृढीकरणार्थम्। किञ्चिद्भर्त्रा पत्न्यनुज्ञातमेव देयम्। किञ्चिन्मुख्येनापि भ्रात्राद्यनुज्ञातमेव देयम्। तथा च वृहस्पतिः "सौदायिकं क्रमायातं शौर्य्यप्राप्तं च यद्भवेत्। स्त्रीज्ञातिस्वाम्यनुज्ञातं दत्तं सिद्धिमवाप्नुयादिति"। सौदायिकं वैवाहिकं यस्याः परिणयने लब्धं तस्याः अनुज्ञयैव दातव्यम्। क्रमायातम्पितृपितामहादिक्रमायातम्। स्त्रीज्ञात्यनुमतं न सकलन्देयम्। "वैवाहिके क्रमायाते सर्वदानन्न विद्यते" इति तेनैवोक्तत्वात्। देयोक्तिप्रसङ्गेन प्रतिग्रहे प्रकारविशेषं दर्शयति याज्ञवल्क्यः "प्रतिग्रहः प्रकाशः स्यात् स्थावरस्य विशेषतः" इति। प्रकाशः प्रकटःससाक्षिक इति यावत्। पुत्रप्रतिग्रहे प्रकारविशेष उक्तो वशिष्ठेन। "पुत्रं परिग्रहीष्यन् बन्धूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वाऽदूरबान्धवमसन्निकृष्टमेव प्रतिगृह्णीयादिति"। अदूरबान्धवं सन्निहितमातुलादिबान्धवम् असन्निकृष्टं सन्निकृष्टभ्रातृभगिनीपुत्रादिव्यतिरिक्तमेव प्रतिगृह्णीयादित्यर्थः। प्रासङ्गिकमुक्त्वा प्रकृतमप्याह याज्ञवल्क्यः "देयं प्रतिश्रुतं चैव दत्त्वा नापहरेत् पुनः" इति। इदन्ते दास्यामीति यत् प्रतिश्रुतन्तदवश्यं तस्मै दातव्यं यदि धर्म्मात् प्रच्युतो न भवति। प्रच्युते पुनर्न दातव्यं "प्रतिश्रुत्याप्यधर्म्मसंयुक्ताय न दद्यादिति" गौतमस्मरणात्। "दत्त्वा नापहरेत् पुनः"। न्यायमार्गेण यत् दत्तं सप्तविधमपि पुनर्नापहर्त्तव्यम् किन्तु तथैवानुमन्तव्यमित्यर्थः। यत् पुनः प्रतिश्रुतन्न ददाति दत्तं वाऽपहरति तस्य दोषमाह हारीतः "प्रतिश्रुतस्याप्रदानेन दत्तस्य छेदनेन च। विविधान्नरकान् याति तिर्य्यग्योनौ च जायते। वाचैव यत्प्रतिज्ञातं कर्म्मणा नोपपादितम्। ऋणं तद्धर्मसंयुक्तमिह लोके परत्र च" इति। यद्धनं धर्म्मसंयुक्तं प्रतिगृहीतुः प्रवृत्तधर्म्मसम्पत्त्यर्थं वाचा प्रतिज्ञातञ्च पश्चादर्पितं तदिह परत्र च ऋणवच्चापेतीत्यर्थः। प्रतिश्रुतमददाना तद्दाप्यो दण्ड्यश्चेत्याह कात्यायनः "स्वेच्छया यः प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहम्। न दद्यादृणवद्दाप्यः प्राप्नुयात्पूर्वसाहसम्" इति। मत्स्यपुराणेऽपि "प्रतिश्रुत्याप्रदातारं सुवर्णं दण्डयेन्नृपः" इति। अनयोर्दण्डयोरपराधानुसारेण व्यवस्था।

दत्तं सप्तविधमदत्तं षोड़शप्रकारमित्याह नारदः "दत्तं सप्तविधं ज्ञेयमदत्तं षोड़शात्मकम्" इति। तत्र दत्तभेदानाह स एव। "पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः। स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः" इति। पण्यमूल्यं क्रीतद्रव्यस्य मूल्यम्। भृतिस्वरूपं कात्यायनेन दर्शितम्। "अभीप्सितोपलब्ध्यर्थं दानं यत्र निरूपितम्। उपलब्धिक्रियालब्धं सा भृतिः परिकीर्त्तिता" इति। प्रयोजनक्रियासम्पादनार्थं भृतिरिष्यत इत्यर्थः। तुष्ट्या परितोषेण वन्दिप्रभृतिभ्यो दत्तमिति शेषः। स्नेहात् प्रीत्या दुहित्रादिभ्यो दत्तम्। प्रत्युपकारतः कृतोपकाराय प्रत्युपकारिणा दत्तम्। तत्प्रदर्शनार्थमाह। कात्यायनः "भयत्राणोपरक्षार्थैस्तथाकार्यप्रसाधनात्। अनेन विधिना लब्धं भयत्राणादिकं धनम्"। उपकारकरणेन लब्धमिति यावत्। स्त्रीशुल्कं विवाहार्थं कन्याबन्धुभ्यो दत्तम्। अनुग्रहार्थं परोपकारः कर्त्तव्य इति विधिबलाद्यत्र कृताप्यनुग्रहार्थं दत्तमेतत् सकलं सफलं भवतीति दर्शयितुन्नारद आह "मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि। दीनानाथविशिष्टेभ्यो दत्तं तु सफलम्भवेदिति"। उपकारिणि परोपकारे सफलं फलातिशयोपेतमित्यर्थः। तदेतत्पण्यादि सप्तविधं दत्तमेव दानविदोविदुः अपरावर्तनीयं विदुरित्यर्थः। वृहस्पतिरपि "भृतिस्तुष्ट्या पण्यमूल्यं स्त्रीशुल्कमुपकारिणे। श्रद्धानुग्रहसंप्रीत्या दत्तं सप्तविधं विदुरिति" अदत्तानि दर्शयति नारदः "अदत्तन्तु भयक्रोधशोकवेगरुगन्वितैः। तथोत्कोचपरीहासव्यत्यासच्छलयोगतः। बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्ज्जितम्। कर्त्ता ममायं कर्मेति प्रतिलाभेच्छया च यत्। अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते। यद्दत्तं स्यादविज्ञानाददत्तमिति

|| श्रीः ||

# वाचस्पत्यम्

## (बृहत् संस्कृताभिधानम्)

गवर्नमेंटसंस्कृतमहाविद्यालय–दर्शन–व्याकरणाध्यापक –

**श्रीतारानाथ–तर्कवाचस्पति–भट्टाचार्येण**

सङ्कलितम्

तेनैव संस्कृतम्

षष्ठो भागः

**राष्ट्रिय संस्कृत संस्थान**

मानित विश्वविद्यालय

(मानवसंसाधन विकास मंत्रालय, भारत सरकार के अधीन)

56–57 इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली – 110058

**पृथु** त्रि० प्रथ—कु सम्प्र०। १विस्तीर्णे स्त्रियां गुणवचनोदन्तत्वात् ङीप्। २आदिराजे वेनपुत्रे सूर्य्यवंश्ये नृपभेदे पु० तदुत्पत्तिकथा भाग० ४।१५ अ०।

अथ तस्य (वेनस्य) पुनर्विप्रैरपुत्रस्य महीपतेः। बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत। तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः। ऊचुः परमसन्तुष्टा विदित्वा भगवत्कलाम्। एष विष्णोर्भगवतः कला भुवनपालिनी। इयञ्च लक्ष्मीः संभूतिः पुरुषस्यानपायिनी। अत्र सः प्रथमो राज्ञां पुमान् प्रथयिता यशः। पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः”। तेन च भगवदवतारेण पृथिवी समीकृता नानौषधीश्च मथिता दुहितृत्वेन कल्पिता च। तत्कथा उत्तरत्राध्याये दृश्या ४।१८ अ०।

“एवं पृथ्वादयः पृथ्वीं दुदुहुः स्वमात्मनः। दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह!। ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः। दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः। चूर्णयन् स्वधनुःकोट्या गिरिकूटानि राजराट्। भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः” ३महादेवे भा० आनु० ८ अ०। चतुर्थमन्वन्तरे काव्ये ४सप्तर्षिभेदे हरिवं० ७अ०। काकुत्स्थे अनेनसः पुत्रे ५नृपभेदे १७अ०। अजमीढवंश्ये पारस्य ६पुत्रभेदे हरिवं० २० अ०। क्रोष्टुवंश्ये चित्ररथस्य पुत्रे ७नृपभेदे २५ अ०। ८दानवभेदे २६अ०। ९अग्नौ मेदि०। १०कृष्णजीरके पु० अमरः ११त्वक्पर्ण्यां १२हिङ्गुपत्र्याञ्च स्त्री मेदि०१३अहिफेने शब्दरत्ना० १४महति त्रि० शब्दर० १५विष्णौ पुं०। “प्राणदः प्रणवः पृथुः” विष्णुस०।

**पृथुक** पु० पृथु कं जलं पेयत्वेनास्त्यस्य अच्। १चिपिटके अमरः। तस्य चर्वणे बहुजलशोषणात् तस्य तथात्वम्। अस्य क्लीवत्वमपि “द्विःखिन्नस्य पृथुकं शुभं देयविशेषके” ब्रह्मवै०ख०२१अ०। पृथु कं शिरोऽस्य। २बालके पुंस्त्री० मेदि०। ३हिङ्गुपत्र्यां स्त्री शब्दरत्ना०।

**पृथुकीय** त्रि० पृथुकाय हितं अपूपा०छ। पृथुकहिते। पक्षे यत् पृथुक्य तत्रार्थे त्रि०।

**पृथुकीर्त्ति** स्त्री पृथानुजायाम् वसुदेवभगिनीभेदे “पृथुकीर्त्यां तु संजज्ञे तनयो वृद्धशर्मणः। करूषाधिपतिर्वीरो दन्तवक्रो महाबलः”। हरिवं० २७ अ० पृथुः कीर्त्तिरस्य। २बहुयशस्के त्रि०।

**पृथुकोल** पु० कर्म०। राजबदरे राजनि०।

**पृथुग्रीव** पु० १राक्षसभेदे रामा०आ०६स०। २विस्तीर्णग्रीवे त्रि०

**पृथुच्छद** पु० पृथु छदोऽस्य। १दर्भे राजनि०। २बृहत्पत्रयुक्ते त्रि०।

**पृथुपत्र** पु० पृथूनि पत्राण्यस्य। रक्तलशुने राजनि०।

**पृथुपलाशिका** स्त्री पृथूनि पलाशान्यस्याः कप् कापि अत इत्त्वम्। शठ्याम् राजनि०।

**पृथुरुक्म** पु० क्रोष्टुवंश्ये रुक्मकवचपुत्रभेदे हरिवं० ३७अ०।

**पृथुरोमन्** पु० पृथूनि रोमाणि रोमस्थानीयशल्कान्यस्य। १मत्स्ये अमरः। २बृहल्लोमयुक्ते त्रि० स्त्रियां वा डाप्।

**पृथुल** त्रि० पृथु+स्वार्थे लच् पृथुः पृथुत्वमस्त्यस्य सिध्मा० लच् वा। १स्थूले अमरः। २हिङ्गुपत्र्यां स्त्री जटाध०।

**पृथुलाक्ष** त्रि० पृथुले अक्षिणी यस्य षच् समा०। १बृहन्नेत्रयुक्ते २पुरुवंश्ये चतुरङ्गपुत्रभेदे पु० हरिवं० ३१ अ०।

**पृथुवक्त्र** त्रि० पृथु वक्त्रमस्य। १बृहन्मुखयुक्ते। २कुमारानुचरमातृभेदे स्त्री भा० श० ४७ अ०।

**पृथुशिम्ब** पु० पृथ्वी शिम्बा यस्य। श्योनाकभेदे राजनि०।

**पृथुशिखर** पु० पृथु शेखरं यस्य। पर्वते त्रिका०।

**पृथुश्रव(स)** त्रि० पृथु श्रवः कर्णोऽस्य। १बृहत्कर्णे अदन्तः २कुमारानुचरभेदे भा० श० ४६ अ०। सान्तस्तु। २शशबिन्दुनृपपुत्रभेदे पु० हरिवं०३६अ०।

**पृथुषेण** पु० अनुवंश्ये रुचिरनृपपुत्रभेदे हरिवं० २० अ०।

**पृथुस्कन्ध** पुंस्त्री पृथुः स्कन्धोऽस्य। शूकरे राजनि० स्त्रियां जातित्वात् ङीष्।

**पृथूदक** न० तीर्थभेदे भा० व० ८३ अ०।

तच्च सरस्वतीप्रदेशस्थितम् यथोक्तम् “जातिस्मरो रुषङ्गुस्तु गङ्गाद्वारे तदा स्थितः। अन्तकालं ततो दृष्ट्वा पुत्रान् वचनमब्रवीत्। इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम्। विज्ञाय तस्य तद्भावं रुषङ्गोस्ते तपोधनाः। तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम्। स तैः पुत्रैः समानीतः सरस्वत्यां समीपतः। स्नात्वा तीर्थगुणान् सर्वान् प्राहेदमृषिसत्तमः। सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम्। पृथूदके जप्यपरो नैनं श्वो मरणं लभेत्। तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्मिता” वामनपु० ३८ अ०।

**पृथूदर** पुंस्त्री० पृथु उदरं यस्य। १मेषे स्त्रियां जातित्वात् ङीष्। २बृहत्कुक्षौ त्रि० हारा०। स्त्रियां स्वाङ्गत्वात् वा ङीष्।

**पृथ्वादि** पु० “पृथ्वादिभ्य इमनिज् वा” पा० भावे इमनिच्प्रत्ययनिमित्ते शब्दगणे स च पा०ग० उक्तो यथा

विश–क्त। अनशनेन मरणायोद्युक्ते भा०आश्व०८०अ०।

**प्रायोपवेश** पु० प्रायाय अनशनमृत्यवे उपवेशः स्थितिः। सङ्कल्पपूर्वकम् सकलकार्यत्यागेन अनशनमरणार्थमुद्यमे मा०य० २५० श्लो०। भावे ल्युट्। प्रायोपवेशन तत्रार्थे न०। भा०व० १५११८ श्लो०।

**प्रायोपेत** त्रि० भीमो भीमसेन वत् प्रायः प्रायोपवेशः तेन उपेतः। प्रायोपवेशनयुते भा०सौ० १६अ०।

**प्रारब्ध** न० प्र+आ+रभ–आरम्भे क्त प्रकृष्टमारब्धं स्वकार्य्यं जननाय कृतारम्भं येन। १दैवाद्यारम्भके २अदृष्टभेदे तस्य च भोगेनैव क्षय इति शास्त्रे प्रसिद्धम्। "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" शास्त्रेण प्रारब्धकर्मणो भोगं विना नाशाभावस्योक्तेः "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरु-तेऽर्जुन!" गीतायां ज्ञानस्य सर्वकर्मनाशकत्वोक्तिः प्रार-ब्धकर्मातिरिक्तविषयेत्याकरे द्रष्टव्यम्। २कृतारम्भे त्रि०।

**प्रारब्धि** स्त्री प्र+आ+रभ–करणे क्तिच्। १गजबन्धनदामनि त्रिका०। भावे क्त। २आरम्भे।

**प्रारम्भण** न० प्र+आ+रभ–ल्युट् नुम्। प्रकर्षेणारम्भे। प्रार-म्भणं प्रयोजनमस्य अनुप्र०छ। प्रारम्भणीय तत्प्रयोजनके त्रि०। प्र+आ+रभ–भावे घञ् नुम्। प्रारम्भ प्रकर्षेण आरम्भे पु० [स्त्रियां टाप्।

**प्रारोह** त्रि० प्ररोहः शीलमस्य छत्रा० ण। प्ररोहणशीले

**प्रार्ण** न०प्रकृष्टमृणं वृद्धिः। १प्रकृष्टे ऋणे प्रा०स०। २तद्युते त्रि०

**प्रार्थना** स्त्री प्र+अर्थ–युच्। १याच्ञायां २हिंसायाञ्च। ३गर्भाङ्कभेदे सा०द० "संभवस्यानुमानस्य प्रार्थना क्षिप्ति-रेव च" गर्भाङ्गान्युद्दिश्य "रतिहर्षोत्सवानान्तु प्रार्थनं प्रार्थना भवेत्" इति लक्षिता। ल्युट्। प्रार्थन याचने हिंसने च न०। ४मुद्राभेदे "प्रसृताङ्गुलिकौ हस्तौ मिथःश्लिष्टौ च सम्मुखे। कुर्य्यात् स्वहृदये सेयं मुद्रा स्यात् प्रार्थनाभिधा" तन्त्रसा०।

**प्रार्थनीय** त्रि० प्र+अर्थ–कर्मणि अनीयर्। १याचनीये अर्थयतेर्याचनार्थत्वेन द्विकर्मकत्वात् गौणे कर्मणि अनी-यर्। यतोयाच्यते २तस्मिन् तस्याविवक्षायां मुख्ये याचनाकर्मणि इति बोध्यम्। ३द्वापरयुगे शब्दर०।

**प्रार्थित** त्रि० प्र+अर्थ+क्त। १याचिते २अभिहिते मेदि० ३शत्रुसंयते च त्रिका०।

**प्रालम्ब** न० प्रकर्षेणालम्बते प्र+आ+लम्ब–अच्। १ऋजुतया कण्ठात् लम्बमाने माल्यादौ अमरः। २प्रकर्षेण लम्ब-मानमात्रे त्रि०। संज्ञायां कन् अत इत्वम्। प्रालम्बिका स्वर्णादिरचितलम्बन्तिकायां स्वर्णहारभेदे स्त्री अमरः।

**प्रालेय** न०प्रकर्षेण लीयते प्र+आ–ली–यत्। आत्वे एत्वम्, प्रलयाय हितस्य अण् नि० एत्वम् वा। हिमे अमरः।

**प्रालेयांशु** पु० प्रालेयमंशौ यस्य। १चन्द्रे हला०। तन्नामना-मके २कर्पूरे च। प्रालेयकरादयोऽप्युभयत्र पु०।

**प्रावट** पु० प्र+अव–अट्। यवे जटा०।

**प्रावण** न० प्र+आ+वन संभक्तौ करणे घ। मनिरित्यादि णत्वम्। खनित्रे। प्रकर्षेणावन्यते संक्षिप्यते मृदनेन ऋ०१।२२।४भाष्ये उणत्वम्। वनं समासे अन्तोदात्ततास्य

**प्रावणि** स्त्री प्र+अव–अनि। "हितुमीमानि कोट्" च ८।४। १५।१६। हितुमीमानीति छित्त्वा उज्ज्वलदत्तेन पठित्वा तत्र णत्वमुक्तम् । प्रकृष्टावनौ तस्यायमाशयः "हीतुमीनश आनि कोट्" सूत्रद्वये मन्त्रप्रकारेण हितुमानीति जायते हितुनीना आनि इत्येषां णत्वम्। योगविभागाच्च आनि कोट् इत्यस्यापीति।

**प्रावर** पु० प्र+आ+वृ–करणे अप्। १प्राचीरे शब्दरत्ना०। २देशभेदे भा०भी० १२अ०। [२उत्तरीयवस्त्रे हेमच०।

**प्रावरण** न० प्र+आ+वृ–करणे ल्युट्। १आच्छादनवस्त्रे

**प्रावार** पु० प्र+आ+वृ–करणे घञ्। १उत्तरीयवस्त्रे अमरः भावे घञ्। २प्रकर्षेण आवरणे पु०।

**प्रावारकर्ण** पु० उलूकभेदे भा० व० १९८अ०।

**प्रावारकीट** पु० ७त०। कीटभेदे जटाधरः।

**प्रावास** त्रि० प्रवासे दीयते कार्यं वा व्युष्टा० अण्। १प्र-वासे दीयमाने २तत्र कार्य्ये च।

**प्रावासिक** त्रि० प्रवासाय प्रभवति सन्तापा० ठञ्। १प्रवास-साधने। प्रवासे साधु गुडा० ठञ्। प्रवासे साधौ च।

**प्रावृट्काल** पु०कर्म०। ६त०वा। वर्षाकाले प्रावृट्समयादयो-ऽप्यत्र।

**प्रावृट्कालवहा** स्त्री ७त०। नदीभेदे मार्कण्डेयपु०६७अ०।

**प्रावृडत्यय** पु०६त०। १वर्षातिक्रमे वर्षापगमे र०व०। २शरत्-काले राजनि०। [प्रकर्षेण २आवृतमात्रे त्रि०।

**प्रावृत** न० प्र+आ+वृ–कर्मणि क्त। १प्रकर्षेण आवृते वस्त्रे

**प्रावृति** स्त्री प्र+आ+वृ–करणे क्तिन्। प्राचीरे शब्दर०।

**प्रावृत्तिक** पु० प्रवृत्तौ तद्वरणे हितः ठक्। प्रवृत्तिवाहके दूतभेदे हरिवं० १०४अ०।

**प्रावृष(षा)** स्त्री प्रवर्षत्यत्र प्र+वृष–आधारे क्विप् दीर्घः हल-न्तत्वात् वा टाप्। वर्षाकाले स च श्रावणभाद्रात्मकः